न कुण्डदधिवत्कश्चित्संसर्गो ऽस्त्यर्थबोधयोः।
तत्कृताकारवत्ता वा प्रागनाकारयोस्तयोः॥

### [4.10.3.4 उपसंहारः]

तदेवं

(१) शाक्योक्तयुक्तिशकलदौर्बल्यात्
(२) सर्वत्र विच्छेदप्रतिभासात्

---

**1** अतो विच्छिन्नश्चेद् ] *Nyāyamañjarīgranthibhaṅga* 223.16–17: अतो विच्छिन्नश्चेदिति। यत एव ज्ञानत्वे च ग्राह्यांशस्य परामर्शो नास्ति तत एव।

**1** Cf. *Tātparyaṭīkā* ad *Ślokavārttika śūnya* 147cd–148ab: तस्मात् सिद्धं ग्राहकाद् भिन्नं ग्राह्यमज्ञानरूपं च।

**4** भाषितम् ] See NM *vijñānādvaita* section 3.6.

**4** Cf. *Ślokavārttika śūnya* 42ab: संसर्गधर्म आकारस् तस्मादेव न युज्यते।

**6** Cf. *Ślokavārttika śūnya* 47: द्वयोराकारनिर्मुक्तं सत्त्वं संसृष्टतां तथा। स्वरूपतः परिच्छिद्य वक्तुमित्यादि युज्यते॥

**9** NM *vijñānādvaita* section 4.10.3.2.2: ज्ञानत्वे तु तस्य का युक्तिः।

**10** NM *vijñānādvaita* section 4.10.3.1; cf. also *khyāti* section 1.4.4.1: आत्मख्यातौ तावदात्मतया विज्ञानस्य ख्यातिर्नास्ति, विच्छेदप्रतिभासाद् इत्युक्तत्वात्।

---

**1** ग्राह्यांशः, सो ऽर्थ ] $MB_1P_1$; ग्राह्यरत्सोऽन्य $M^{kha}$; ग्राह्यः सो ऽन्य V; ग्राह्यं सो र्थ $C_1C_2$; ग्रायंशः सो त $O_1$ **5** न कुण्ड॰ ] $MVB_1C_1C_2P_1$; नु कुंड॰ $O_1$ **5** ऽस्त्यर्थ॰ ] $MVB_1C_1C_2P_1$; स्त्वर्थ॰ $O_1$ **9** शाक्योक्त॰ ] $MVC_1C_2O_1P_1$; शाक्योर्थ॰ $B_1$ **9** ॰शकल॰ ] $MC_1C_2$; ॰कौशल॰ $M^{kha}VB_1O_1P_1$ **9** ॰दौर्बल्यात् ] $MVC_1C_2O_1P_1$; ॰दौर्बल्यत् $B_1$

(३) स्वच्छात्मनश्च ज्ञानस्य स्वतो वैचित्र्यानुपपत्तेर् अर्थस्यायमाकार इति सिद्धम्।

[4.11 विरुद्धाकारसमावेशः]

यत्त्वर्थाकारपक्षे चोदितम्—एकत्रार्थे नक्षत्रं तारका तिष्य इति परस्परविरुद्धाकारसमावेशो न युक्तः—इति, तत्रोच्यते।

[4.11.1 दृष्टे विषये नानुपपन्नं नाम]

अनुपपन्नमिति नः क्व संप्रत्ययः।
यन्न प्रमाणेनावगतम्।
विरुद्धमपि तदवबुद्ध्यामहे।
यदेकत्र निविशमानं न पश्यामः।

तदिह यद्यबाधितेन ज्ञानेन विस्पष्टमाकारत्रयमेकत्र गृह्यते, तत्क-

---

**1** Cf. *Ślokavārttika śūnya* 15–17 (Buddhist view): **मत्पक्षे यद्यपि स्वच्छो ज्ञानात्मा परमार्थतः। तथाप्यनादौ संसारे पूर्वज्ञानप्रसूतिभिः॥ चित्राभिश्चित्रहेतुत्वाद् वासनाभिरुपप्लवात्। स्वानुरूप्येण नीलादिग्राह्यग्राहकरूषितम्। प्रविभक्तमिवोत्पन्नं नान्यमर्थमपेक्षते। अन्योन्यहेतुता चेयं ज्ञानशक्त्योरनादिका॥**
**4 चोदितम्** ] See NM *vijñānādvaita* section 3.7.1; *Ślokavārttika śūnya*, v. 58: **नक्षत्रं तारका तिष्यो दारा इत्येवमादिषु। नैकत्रार्थे विरुद्धत्वाल्लिङ्गानेकत्वसंभवः॥**

---

**1 स्वच्छात्मनश्च** ] $VB_1C_1C_2O_1P_1$; om. M **1 ज्ञानस्य** ] $MVB_1C_1C_2O_1^{pc}P_1$; **ज्ञान र्थे नक्षत्रं तारक तिष्य इति परस्परविरुद्धो स्य** $O_1^{ac}$ **1 वैचित्र्या°** ] $MC_1C_2P_1$; **विचित्रत्वा°** V; **विचित्र्या°** $B_1$; **विचित्र्व्या°** $O_1$ **2 अर्थस्या°** ] $P_1$; **अर्थस्यैवा°** $MVB_1C_1C_2O_1$ **4 यत्त्वर्थाकार°** ] $MC_1C_2P_1$; **यत्तु आकार°** $M^{kha}$; **यत्त्वाकार°** $VB_1O_1$ **4 °पक्षे चोदितम्** ] $MVB_1C_1C_2P_1$; **°पक्षत्चोदित** $O_1$ **4 तारका** ] $MVC_1C_2P_1$; **तारक** $B_1O_1$ **4 तिष्य इति** ] $MVB_1C_1P_1$; **तिष्यक इति** $C_2$; **तिष्य यति** $O_1$ **5 परस्पर°** ] $MVB_1C_1C_2P_1$; **पर°** $O_1$ **5 °वेशो न** ] $MVB_1C_1C_2P_1$; **°वेशेन** $O_1$ **7 नः** ] $MVB_1C_1C_2P_1$; **न** $O_1$ **9 तदवबुद्ध्यामहे** ] $MB_1C_1C_2P_1$; **तद् बुध्यामहे** V; **तिदवबुद्ध्यामहे** $O_1$ **10 निविशमानं** ] $MC_2P_1$; **निविश्यमानं** V; **नविशमानं** $B_1$; **निविशमान्न** $C_1$; **निविशमामानं** $O_1$ **11 यद्यबाधितेन** ] $MVC_1C_2P_1$; **यदि भाध्यतेन** $B_1$; **ययवाधितेन** $O_1$

थमनुपपन्नं स्यात्, कथं वा विरुद्धमिति।

[4.11.2 **न सर्वत्र समानः**]

अथैकं सम्यक्प्रमाणपरिनिश्चितं रूपम् इतरत्काल्पनिकमिति प्रतीयते, तदेवमस्तु, को दोषः। दृष्टश्च चित्रादावनेकवर्णसमावेशः। न चैकत्र विरोधमविरोधं वा दृष्ट्वा सर्वत्र तत्कल्पनमुचितम्। अबाधितावगतिनिबन्धना हि वस्तुस्थितयो भवन्ति, न कल्पनानिर्मिताः।

[4.11.3 **शब्दप्रयोगसाधुत्वम्**]

अपि वा वस्तुताद्रूप्यसदसत्तानपेक्षया।
शब्दप्रयोगसाधुत्वमन्वाख्यायेत केवलम्॥

"दाराः" इति नैकस्याः स्त्रीव्यक्तेः पुंस्त्वं बहुत्वं वा विद्यते। शब्दस्त्वेष तत्र प्रयुज्यमानः साधुर्भवति।

[4.11.4 **नार्थासंस्पर्शिता**]

नार्थासंस्पर्शिता चास्य तावता व्यवतिष्ठते।

---

**1** Cf. NM *khyāti* section 2.2.4.4: **अत एवैकत्रापि धर्मिणि बहूनामनितरेतरोपमर्देन वेद्यमानानामस्त्येव धर्माणां समावेशः।**
**4 दृष्टश्च चित्रादावनेकवर्णसमावेशः** ] *Nyāyamañjarīgranthibhaṅga* 223.18–19: **दृष्टश्च चित्रादावनेकवर्णसमावेश इति। न चासौ दृष्टत्वादेवापारमार्थिक इति शेषः।**; cf. NM *khyāti* section 2.2.4.3: **चित्रादिप्रत्यये कथं न बाध इति चेत्। पूर्वज्ञानोपमर्देनोत्तरज्ञानानुत्पादात्।**
**8** For Kumārila's solution, see *Ślokavārttika śūnya* 212b–214.

---

**1 °थमनुपपन्नं** ] $VB_1C_1C_2O_1P_1$ ; **°थं नोपपन्नं** M  **1 कथं वा** ] $MC_1C_2^{pc}P_1$ ; om. $M^{kha}VB_1O_1$ ; **कथं** $C_2^{ac}$  **3 अथैकं** ] $MVB_1C_1C_2P_1$ ; **अथैक** $O_1$  **3 °निश्चितं** ] $B_1C_1C_2O_1P_1$ ; **°निश्चित°** MV  **4 °वर्ण°** ] $MC_1C_2P_1$ ; **°वल°** $M^{kha}B_1O_1$ ; **°बल°** V  **9 °ख्यायेत** ] $MVB_1O_1P_1$ ; **°ख्यायत** $C_1C_2$  **10 बहुत्वं** ] $VB_1C_1C_2O_1P_1$ ; **हुवं -त्ब** M  **11 प्रयुज्यमानः** ] $MVC_1C_2O_1P_1$ ; **प्रयुज्यमानाः** $B_1$  **13 नार्था°** ] $MVC_1C_2O_1P_1$ ; **नार्थ°** $B_1$  **13 तावता** ] $MB_1C_1C_2O_1P_1$ ; **तावतां** V

असौ तदात्मकं वस्तु तथा शक्नोति भाषितुम्॥

[4.11.5 **अर्थस्यानेकशक्तित्वम्**]

परिव्राट्प्रभृतीनां च कुणपादिप्रतीतयः।
अर्थस्यानेकशक्तित्वान्नावहन्त्यर्थशून्यताम्॥
किं न भक्षयितुं शक्या नारी कौलेयकेन सा।
किं वा न शमयत्येषा कामिनो मदनज्वरम्॥
शवाद्वा केन रूपेण सा विशिष्येत योगिनः।
धीत्रयं तु न सर्वेषामभावात्सहकारिणः॥

[4.11.6 **वासनाभेदापेक्षा**]

प्रतिप्राणिनियतानेकविधवासनाभेदसहकारिसापेक्षो हि तस्य तस्य ज्ञानस्यात्मलाभ इति न सर्वेषां सार्वरूप्येण ज्ञानम्।

---

**1 तथा शक्नोति भाषितुम्** ] *Nyāyamañjarīgranthibhaṅga* 223.20: **तथा शक्नोति भाषितम्** (sic) **बहुवचनादियुक्तो नान्यथा।**

**3** See NM *vijñānādvaita* section 3.7.1; *Ślokavārttika śūnya* 59ab: **परिव्राड्कामुकशुनां कुणपादिमतिस्तथा।**; Kumārila's reply given at *Ślokavārttika śūnya* 215–216: **कुणपादिमतौ चैवं, सार्वरूप्ये व्यवस्थिते। वासनाः सहकारिण्यो व्यवस्थाकारदर्शने॥ स्वप्रत्ययानुकारो हि बह्वाकारेषु वस्तुषु। निर्धारणे भवेद्धेतुर्, नापूर्वाकारकल्पने॥**

**11 सार्वरूप्येण** ] See *Ślokavārttika śūnya* 215b quoted above.

---

**1 असौ** ] $M^{kha}VB_1O_1P_1$ ; **यथै॰** $MC_1C_2$ **5 भक्षयितुं** ] $MVC_1C_2O_1P_1$ ; **भक्षियितुं** $B_1$ **5 सा** ] $MVB_1O_1P_1$ ; **वा** $M^{ca}C_1C_2$ **6 शमय॰** ] $MVC_1C_2O_1P_1$ ; **शम इ॰** $B_1$ **6 ॰त्येषा कामिनो** ] $MVB_1C_1C_2P_1$ ; **॰त्येषां कामिनो** $O_1$ **7 ॰द्वा केन** ] $MVB_1C_1C_2O_1$ ; **॰द्वात्केन** $P_1$ **7 विशिष्येत** ] $MVB_1C_2O_1P_1$ ; **विशिष्यत** $C_1$ **10 ॰प्राणि॰** ] $MVB_1C_1C_2P_1$ ; **॰पाणि॰** $O_1$ **10 ॰भेद॰** ] $MC_1C_2P_1$ ; om. $M^{kha}VB_1O_1$ **10 तस्य तस्य** ] $MB_1C_1C_2$ ; **तस्य** $M^{kha}VO_1P_1$ **11 न** ] $MC_1C_2P_1$ ; om. $VB_1O_1$ **11 सार्वरूप्येण** ] $P_1$ ; **सर्वसारूप्येण** MV ; **सावरूप्येण** $B_1$ ; **शवरूपेण** $C_1C_2$ ; **सार्वरूपेण** $O_1$ **11 ज्ञानम्** ] $MVB_1C_2O_1P_1$ ; **विज्ञानं** $C_1$

[4.12 वासना]

यद्येवम्, वासनाभेद एव विविधप्रतिभोद्भवहेतुर्भवतु, किमर्थकल्पनया।

[4.12.1 नार्थः कल्प्यते]

अयि साधो, किमद्यापि न परिहरसि सुचिरगुणितां कल्पनावाचोयुक्तिम्। न ह्यर्थः कल्प्यते, अपि तु प्रतिभासत एव। बहुरूपस्य तु तस्यैकतमरूपपरिच्छेदनियमे किमपि वासनादि कारणं क्वचित्कल्प्यते। कस्तावतार्थनिह्नवस्यावकाशः।

[4.12.2 वासना ज्ञानादव्यतिरिक्ता व्यतिरिक्ता वा]

यच्चोक्तम्—

(१) वासनाभेद एव ज्ञानवैचित्र्यकारणम्,

(२) इतरेतरकार्यकारणभावप्रबन्धश्च बीजाङ्कुरवदनादिर्ज्ञानवासनयोः—इति, तदप्यघटमानम्। केयं वासना नाम।

(१) ज्ञानादव्यतिरिक्ता चेत्, सापि स्वच्छरूपत्वान्न ज्ञानकालुष्य-

---

**10 यच्चोक्तम्** ] See NM *vijñānādvaita* section 3.4.4.2.

**13** Cf. *Ślokavārttika nirālambana* 178–179: न चास्ति वासनाभेदो निमित्तासंभवात्तव। ज्ञानभेदो निमित्तं चेत्, तस्य भेदः कथं पुनः॥ वासनाभेदतश्चेत्स्यात्, प्राप्तमन्योन्यसंश्रयम्। स्वच्छस्य ज्ञानरूपस्य न हि भेदः स्वतो ऽस्ति ते॥

---

**2 विविध॰** ] $MVB_1C_1C_2O_1$; **विध॰** $P_1$  **2 ॰हेतुर्भवतु** ] $C_2P_1$; **॰हेतुर्भवति** $MVO_1$; **॰तुहेतुर्भवति** $B_1$; **॰हेतु भवतु** $C_1$  **5 परिहरसि** ] $VB_1C_1O_1P_1$; **परिहरसौ** M; **परिहरति** $M^{ca}C_2$  **5 सुचिर॰** ] $B_1C_1C_2P_1$; **सुचिरं** $MVO_1$ **5 ॰गुणितां** ] $MVC_1C_2O_1P_1$; **॰गुणिता** $B_1$  **6 ॰वाचोयुक्तिम्** ] $MVB_1C_1C_2P_1$; **॰चोयुक्तिं** $O_1$  **8 ॰स्यावकाशः** ] $M^{kha}VO_1P_1$; **॰स्यावसरः** $MC_1C_2$; **॰स्याकाशः** $B_1$  **10 यच्चोक्तम्** ] $MB_1C_1C_2P_1$; **यच्चेत्थं** $M^{kha}VO_1$  **12 ॰नादिर्ज्ञा॰** ] $MVB_1C_1C_2P_1$; **॰नादिज्ञा॰** $O_1$  **13 ॰वासन॰** ] $VCC_2O_1P_1$; **॰यासन॰** M; **॰वासनादि॰** $B_1$  **13 तदप्यघटमानम् ··· ॰रिक्ता चेत्** ] lacuna $C_2$  **14 सापि** ] $MVB_1O_1P_1$; **सा च** $C_1C_2$  **14 ॰रूप॰** ] $MVB_1O_1P_1$; **॰स्वरूप॰** $C_1C_2$

कारणं भवेत्।

(२) ज्ञानव्यतिरिक्ता चेद्वासना तद्वैचित्र्यहेतुश्च, सो ऽर्थ एव पर्यायान्तरेणोक्तः स्यात्।

[4.12.3 अनुभूतस्मरणोपजननहेतुर्वासना]

अपि च वासना नाम विषयानुभवसमाहितः संस्कार इति लोके प्रसिद्धिः। संस्कारश्च यदनुभवघटितः, तत्रैव क्वचिदवसरे स्मरणमुपजनयति, न पुनरसदेव वैचित्र्यमिदमीदृशमावहति।

[4.12.4 वास्यवासकभावानुपपत्तिः]

किं च भिक्षुपक्षे क्षणिकत्वेन ज्ञानानां ग्राह्यग्राहकभाव इव वास्यवासकभावो ऽपि निराकर्तव्यः। स्थायिनो हि भावास्तिलादयः स्था-

---

**5** Cf. *Ślokavārttika nirālambana* 180–181ab: **प्रमाणं वासनास्तित्वे भेदे वापि न विद्यते। कुर्याद् ग्राहकभेदं सा ग्राह्यभेदस्तु किंकृतः॥ संवित्त्या जायमाना हि स्मृतिमात्रं करोत्यसौ।**

**9 किं च भिक्षुपक्षे क्षणिकत्वेन ज्ञानानां** ] *Nyāyamañjarīgranthibhaṅga* 223.21–22: **किञ्च भिक्षुपक्षे क्षणिकत्वेन ज्ञानानामित्यादिना वास[ना]मा[त्रेण] शब्दार्थाघटमानतामाह।**

**9 ग्राह्यग्राहकभाव इव** ] NM *vijñānādvaita* 4.10.3.2.2.1.

**10** Cf. *Ślokavārttika nirālambana* 181cd–182ab: **क्षणिकेषु च चित्तेषु विनाशे च निरन्वये॥ वास्यवासकयोश्चैवमसाहित्यान्न वासना।**

---

**3 ॰णोक्तः** ] $MVC_1C_2O_1P_1$; **॰णो र्थः** $B_1$ **5 अपि च वासना नाम** ] lacuna $C_2$ **5 नाम** ] $MB_1C_1P_1$; om. $M^{kha}VO_1$ **5 संस्कार** ] $MVC_1C_2O_1P_1$; **संसार** $B_1$ **7 ॰मुपजनयति** ] $MC_1C_2P_1$; **॰मनुभवति** $M^{kha}VO_1$; **॰मनुभवज्ञनयति** $B_1$ **7 ॰मिदमीदृश॰** ] $MVB_1O_1P_1$; **॰मिद॰** $C_1C_2$ **9 ॰पक्षे क्ष॰** ] $MVB_1C_1C_2P_1$; **॰पक्षि॰** $O_1$ **9 ॰कभाव इव** ] lacuna $C_2$ **10 वास्यवासक॰** ] $MVB_1C_1C_2P_1$; **वासक॰** $O_1$ **10 ॰भावो** ] $MVC_1C_2P_1$; **॰भावे** $B_1O_1$ **10 भावा॰** ] $MVC_1C_2O_1P_1$; **भवा॰** $B_1$

यिभिरेव चम्पकादिभिर्वास्यन्ते। न तूत्पद्य सपद्येव विनश्यद्भिर्ज्ञानै-स्तादृंश्येव ज्ञानानीति।

निरन्वयविनाशाच्च न तदंशो ऽनुवर्तते।
यतः कथंचिद्वास्येत पूर्वेण ज्ञानमुत्तरम्॥

[4.12.5 वासनानियमः]

अपि चैकत्र देवदत्तसंताने वासनाशतसहस्राणि ज्ञानवैचित्र्यकारीणि भवेयुः। न हि गोवासनातो हस्तिज्ञानमुदेति।

अनन्तत्वे ऽपि खल्वासामारम्भे नियमः कुतः।

---

**1** Cf. *Ślokavārttika nirālambana* 185ab: अवस्थिता हि वास्यन्ते भावा भावैरवस्थितैः।
**2** Cf. *Ślokavārttika nirālambana* 182–184: पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तरः क्षणः॥ उत्तरेण विनष्टत्वान्न च पूर्वस्य वासना। साहित्ये च तयोर्नैव संबन्धो ऽस्तीत्यवासना॥ क्षणिकत्वाद् द्वयस्यापि व्यापारो न परस्परम्। विनश्यच्च कथं वस्तु वास्यते ऽन्येन नश्यता॥
**6** Cf. *Ślokavārttika nirālambana* 190cd–192ab: यदि स्यादानुरूप्याच्च वासना, गोधियो यदा॥ हस्तिबुद्धिर्भवेत्, तत्र वैलक्षण्यान्न वासना। ततः परं च गोज्ञानं निर्मूलत्वान्न संभवेत्॥ सर्वं विलक्षणं ज्ञानं न स्यादेव विलक्षणात्।
**8** Cf. *Ślokavārttika nirālambana* 178–180ab: न चास्ति वासनाभेदो निमित्तासंभवात्तव। ज्ञानभेदो निमित्तं चेत्, तस्य भेदः कथं पुनः॥ वासनाभेदतश्चेत्स्यात्, प्राप्तमन्योन्यसंश्रयम्। स्वच्छस्य ज्ञानरूपस्य न हि भेदः स्वतो ऽस्ति ते॥ प्रमाणं वासनास्तित्वे भेदे वापि न विद्यते।; *Vibhramaviveka* 144: तथा ह्यनादौ संसारे कर्मभेदान् स्मरन्नपि। अनन्तकृतकर्मत्वात्को विद्यात्कस्य किं फलम्॥

---

**1 तूत्पद्य** ] $MVB_1C_2O_1P_1$; **तूत्पाद्य** $C_1$ **1 सपद्येव** ] $MVC_1C_2O_1P_1$; **संपदेव** $B_1$ **1 विनश्यद्भि°** ] $MC_1C_2$; **नश्यद्भि°** $VB_1O_1P_1$ **2 °स्तादृंश्येव** ] $MVP_1$; **°स्तादृशेव** $B_1$; **°स्तादृंक्श्येव** $C_1C_2$; **°स्तादृश्येव** $O_1$ **2 ज्ञानानीति** ] $MVO_1P_1$; **ज्ञानानेति** $B_1$; **ज्ञानानि** $C_1C_2$ **4 कथंचि°** ] $VB_1C_1P_1$; **कथश्चि°** $M$; **कश्चि°** $O_1$ **4 °ते। यतः कथंचि°** ] lacuna $C_2$ **6 वासनाशत°** ] $C_1C_2$; **वासनातः** $M$; **वासना यतः** $V$; **वासनायत°** $B_1O_1$; **वासनायुत°** $P_1$ **6 °कारीणि** ] $MVC_1C_2O_1P_1$; **°कारेणि** $B_1$ **8 °ल्वासामारम्भे** ] $MVO_1P_1$; **°ल्वासमारंभे** $B_1$; **°ल्वासामारंभ°** $C_1C_2$

आसमञ्जस्यकारित्वे व्यवहारस्य विप्लवः॥
धूमज्ञानसमुत्पादे धूमवासनया कृते।
किं तदा न जलज्ञानं जनयेज्जलवासना॥

[4.12.6 **वासना वासनासंतानारम्भहेतुः**]

वासनाश्च स्वसदृशसंतानारम्भहेतव एव भवेयुः, न पुनरनुभवज्ञानमाधातुमुद्यच्छेयुः। सदृशात्सदृशोत्पत्तिरिति हि भवतां दर्शनम्।

[4.12.7 **वासनाधारः**]

अपि च न निराधारा वासना आसते। न च भवत्पक्षे तदाधारः कश्चन संभवति, भङ्गुरत्वेन ज्ञानस्य तदाश्रयत्वानुपपत्तेः। (१) एकज्ञानाश्रितत्वे सर्ववासनानां तद्विनाशे विनाशः स्यात्।

---

**6** Cf. *Ślokavārttika nirālambana* 196cd–197: **वासनानां प्रवाहो ऽपि यदि ज्ञानप्रवाहवत्॥ वासनातस्ततो ज्ञानं न स्यात् तस्माच्च वासना। कुर्यातां तुल्यमेवैते, नान्योन्यं तु कदाचन॥**
**9** Cf. *Ślokavārttika nirālambana* 194–196ab: **तत्रैव ज्ञाननाशेन विनष्टाः सर्ववासनाः। तेन सर्वाभ्य एताभ्यः सर्वाकारं यदुत्थितम्॥ ज्ञानमेकक्षणेनैव विनाशं गन्तुमर्हति। यद्याश्रयविनाशे ऽपि शक्त्यनाशो ऽभ्युपेयते॥ क्षणिकत्वं च हीयेत, न चारम्भो ऽन्यथा भवेत्।**

---

**1 आसमञ्जस्य॰** ] $P_1$; **असमंजस॰** MV; **असमंजस्य॰** $B_1O_1$; **असामञ्जस्य॰** $M^{ca}C_1C_2$ **1 व्यवहारस्य** ] $MVC_1C_2O_1P_1$; **विवहारस्य** $B_1$ **5 स्वसदृश॰** ] $VB_1C_1C_2O_1P_1$; om. M **5 ॰संताना॰** ] $C_1C_2$; **॰वासनासंताना॰** $MVB_1O_1P_1$ **5 ॰रम्भहेतव** ] $MVB_1C_1O_1P_1$; **॰रांभहेतव** $C_2$ **5 एव** ] $MVC_1P_1$; **इव** $M^{ca}B_1O_1$ **6 भवतां** ] $MVB_1C_2O_1P_1$; **भवता** $C_1$ **8 न च** ] $MVB_1O_1P_1$; om. $C_1C_2$ **9 ॰रः कश्चन** ] $MVB_1P_1$; **॰रः कश्चिन्न** $C_1C_2$; **॰र कश्चन** $O_1$ **10 ॰ज्ञानाश्रित॰** ] $MVB_1C_2O_1P_1$; **॰ज्ञाश्रित॰** $C_1$ **10 सर्व॰** ] $B_1C_1C_2P_1$; **सर्वासां** MV; **सर्वा** $O_1$ **10 ॰वासनानां ··· कुसूलज्ञानविनाशः स्यात्** ] $MVB_1C_2O_1P_1$; **॰वासनाकुसूलज्ञानविनाशस्स्यात्** $C_1$ (eyeskip) **10 तद्विनाशे** ] $MVC_2O_1P_1$; **तद्विनाशो** $B_1$ **10 विनाशः** ] $C_2P_1$; **नाशः** $MVB_1O_1$

(२) प्रतिवासनमाश्रयभेदे तदानन्त्यमनियमश्च शतशाखः।

### [4.12.8 आलयविज्ञाननिरासः]

न चालयविज्ञानं नाम किंचिदस्ति। सत्यपि तस्मिन्नशेषवासनासहस्रसमाश्रये तत्क्षणिकत्वात् सकृदेव तथाविधवासनाकुसूलज्ञानविनाशः स्यात्। पुनरुत्पादे वा तथाविधमेव तज्ज्ञानम् उत्पद्येत, न तु गवाश्वादिज्ञानक्रमनियमो भवेत्—इति सर्वथा सङ्कटो ऽयं पन्थाः।

### [4.12.9 उपसंहारः]

तस्मान् मृगतृष्णिकैषा तपस्विनाम्—"वासनात एव लोकयात्रासिद्धेः किं बाह्येनार्थेन" इति।

### [4.13 आकारो न बुद्धेः सिध्यति]

---

**3 न चालयविज्ञानं नाम किंचिदस्ति** ] *Nyāyamañjarīgranthibhaṅga* 224.11–12: **न चालयविज्ञानं नाम किञ्चिदस्तीति। आलीयन्ते प्रवृत्तिज्ञानैर्जनिता वासना एकत्र यस्मिंस्तदालयविज्ञानं शक्तिविज्ञानमिति चोच्यते।**

**5** Cf. *Tātparyaṭīkā* ad *Ślokavārttika nirālambana* 193cd–195ab: **आलयविज्ञानविनाशे च तदाधारा वासना विनश्यन्ति। ततश्च ताः स्वानुरूपाणि विज्ञानानि विचित्राणि जनयन्ति।**

**9** Cf. *Ślokavārttika nirālambana* 201: **युक्त्यानुपेतामसतीं प्रकल्प्य यद्वासनाम् अर्थनिराक्रियेयम्। आस्थानिवृत्त्यर्थमवादि बौद्धैर्, ग्राहं गतास्तत्र कथंचिदन्ये॥**

---

**1 °यभेदे** ] $VB_1C_2O_1P_1$ ; **°याभेदे** M　**1 तदानन्त्यम°** ] $M^{kha}VP_1$ ; **तदानन्त्येना°** $MC_2$ ; **तदानिंत्यम°** $B_1$ ; **तदानन्यम°** $O_1$　**1 °नियमश्च** ] $MVB_1O_1P_1$ ; **°नियमः** $C_2$　**1 शतशाखः** ] $MVC_2O_1P_1$ ; **शतंशाखः** $B_1$　**3 चालय°** ] $MVC_2O_1P_1^{pc}$ ; **चालयं** $B_1$ ; **चाल°** $P_1^{ac}$　**4 °कुसूल°** ] $MB_1P_1$ ; **°कुमूल°** $VC_2^{pc}O_1$ ; **°कुतूल°** $C_2^{ac}$　**5 वा** ] $M^{kha}P_1$ ; **ऽपि कथं** $MC_1C_2$ ; om. $VB_1O_1$　**5 तथाविधमेव तज्ज्ञानम्** ] $VO_1P_1$ ; **तथाविधं ज्ञानमेव** $MC_1C_2$ ; **तथाविधमेव तज्ज्ञानमेव** $B_1$　**5 उत्पद्येत** ] $P_1$ ; **समुत्पाद्येत** $MC_2$ ; **उत्पद्यते** $VB_1O_1$ ; **समुत्पाद्येते** $C_1$　**6 गवाश्वादि°** ] $MVB_1C_1C_2P_1$ ; **गवाद्वादि°** $O_1$　**6 °ज्ञान°** ] $MC_1C_2P_1$ ; om. $M^{kha}VB_1O_1$　**6 सङ्कटो** ] $MVB_1C_1C_2P_1$ ; **संकोटो** $O_1$　**8 °तृष्णिकैषा** ] $MVC_1C_2P_1$ ; **°तृष्णैषा** $B_1$ ; **°तृष्णैष्य** $O_1$　**9 °सिद्धेः** ] $VB_1C_1C_2O_1P_1$ ; **°लिद्धेः** M

कृतमतिवाचालतया, चिरमपि निपुणैर्निरूप्यमाणो ऽतः।
अर्थस्यैव न बुद्धेः सिध्यति नीलादिराकारः॥
एकश्च बोधः प्रमितिप्रमाणप्रमेयरूपाणि कथं बिभर्ति।
भिन्नं प्रमाणात् फलमभ्यधायि प्रत्यक्षचिन्तावसरे पुरस्तात्॥

## [5 अवयव्यपह्नवनिरासः]

### [5.1 पूर्वपक्षः]

ये तु ब्रुवते। तिष्ठतु तावत्प्रमाणमार्गः। प्रमेयमेव विकल्पयन्तो न बाह्यमर्थं कंचन निरपवादं प्रतिपद्यामहे। तथा हि न तावदयमवयवी

---

**3** Cf. NM *vijñānādvaita* section 3.8; see also NM I 189.2–8: **यस्तु मूढतरः प्रमाणप्रमेयफलव्यवहारमेकत्रैव ज्ञानात्मनि निर्वाहयितुमुद्यच्छति—यदाभासं प्रमेयं तत् प्रमाणफलते पुनः। ग्राहकाकारसंवित्त्योस्, त्रयं नातः पृथक् कृतम्॥ इति, तमपवर्गाह्निके ज्ञानाद्वैतदलनप्रसङ्गे** (**°प्रसङ्गे**] $P_1$; **°प्रसङ्गेन** M) **दुराचारं निर्भर्त्सयिष्यामह इत्यलं विस्तरेण। तस्मात् सुष्ठूक्तम्—यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलम्—इति।**
**4** NM I 188.12–13: **प्रमाणस्य प्रमाणत्वं तस्मादभ्युपगच्छता** (**°ता**] $P_1$; **°ताम्** M) **। भिन्नं फलमुपेतव्यम्, एकत्वे तदसंभवात्॥**
**8** Cf. *Ślokavārttika nirālambana* 17: **बाह्यार्थापह्नवे द्वैधम्, एको ऽर्थस्य** (**द्वैधम्, एको ऽर्थस्य**] $I_1$; **ऽद्वैतमेकार्थस्य** ed.) **परीक्षणात्। प्रमाणमाश्रितश्चैकस्, तत्रास्तां यः प्रमेयतः॥**

---

**1 कृतमति°**] $MVC_1C_2O_1P_1$; **कृतमपि** $B_1$ **1 °रूप्यमाणो**] $MVB_1C_1C_2P_1$; **°रूपिमाणो** $O_1$ **2 न**] $MVB_1C_1C_2P_1$; om. $O_1$(unmetrical) **2 सिध्यति**] $MVB_1C_1C_2P_1$; **किंवाह्येनार्थेनेति कृतमतिवाच सिद्धि** $O_1^{ac}$(unmetrical); **सिद्धि** $O_1^{pc}$(unmetrical) **3 °रूपाणि**] $MVC_1C_2^{pc}O_1P_1$; **°रूपादि** $B_1$; **°रूपेण** $C_2^{ac}$ **3 बिभर्ति**] $MVB_1C_1P_1$; **विभर्ति** $C_2$; **भिभर्ति** $O_1$ **4 भिन्नं**] $MB_1C_1C_2O_1P_1$; **भिन्न°** $M^{kha}V$ **4 प्रमाणात्**] $MVB_1C_2O_1P_1$; **प्रमाणं** $M^{ca}C_1$ **4 °भ्यधायि**] $MVB_1C_1C_2P_1$; **°भिधायि** $O_1$ **7 °मार्गः**] $B_1P_1$; **°मार्ग इति** M; **°मात्रं** $M^{kha}V$; **°मार्ग इति** $C_1C_2$; **°मात्रः** $O_1$ **7 विकल्पयन्तो ⋯ तावदयमवयवी**] om. $O_1^{ac}$ **7 न**] $MVC_1C_2O_1^{pc}P_1$; **ना°** $B_1$ **8 निरपवादं**] $MVC_1C_2O_1^{pc}P_1$; **निरपवाद** $B_1$ **8 तावदयमवयवी**] $MVB_1C_1C_2O_1^{pc}$; **तावदवयवी** $P_1$

घटादिरवकल्पते।

### [5.1.1 अवयवव्यतिरेकेणानुपलम्भात्]

अवयवव्यतिरेकेणावयविनो ऽनुपलम्भात्। यो हि यस्माद्व्यतिरिक्तः स तदधिष्ठितदेशव्यतिरिक्तदेशाधिष्ठान उपलभ्यते घटादिव पटः। न चैवमवयवेभ्यः पृथग्देशो दृश्यते ऽवयवी।

### [5.1.2 अवयवाग्रहण अवयव्यग्रहणात्]

तदग्रहे च तद्बुद्ध्यभावात्। घटाग्रहणे ऽपि पटो गृह्यते, न त्ववयवानुपलब्धाववयवीति कथं स तेभ्यो भिद्यते।

### [5.1.3 अवयवग्रहणानुपपत्तेः]

अवयवग्रहणानुपपत्तेश्च। न हि सर्वे तदवयवाः शक्यन्ते ग्रहीतुम्,

---

**3** Vasubandhu's *Viṃśikāvṛtti* ad 11: न तावदेकं विषयो भवति, अवयवेभ्यो ऽन्यस्यावयविरूपस्य क्वचिदप्यग्रहणात्।

**4** Cf. NM *apoha* I section 3.2: देशभेदस्य चाग्रहणात्। यत् खलु यतो व्यतिरिक्तं तत् तदधिष्ठितदेशव्यतिरिक्तदेशाधिष्ठानमवधार्यते, घटादिव पटः। न चैवं जातिव्यक्ती इति न तयोर्भेदः।

**7** Cf. NM *apoha* I section 3.3: अतश्चैवम्, तदग्रहे तद्बुद्ध्यभावात्। यद्धि यतो व्यतिरिक्तं तत् तस्मिन्नगृह्यमाणे ऽपि गृह्यते, घटादिव पटः। न च व्यक्तावनुपलभ्यमानायां जातिरुपलभ्यते। तस्मान्न ततो ऽसौ भिद्यते।

---

**1 घटादि॰** ] MVB$_1$O$_1$P$_1$; **घाति॰** C$_1$C$_2$  **3 ॰विनो ऽनुप॰** ] lacuna C$_2$  **3 ऽनुपलम्भात्** ] MVC$_1$O$_1$P$_1$; **पलम्भात्** B$_1$; ++**लंभाद्** C$_2$  **4 घटादिव** ] VB$_1$O$_1$P$_1$; **घटदिव** M; **घटादि॰** C$_1$C$_2$  **5 दृश्यते** ] MVC$_1$C$_2$O$_1$P$_1$; **रुच्यते** B$_1$  **5 ऽवयवी ··· गृह्यते** ] MB$_1$C$_1$C$_2$P$_1$; om. M$^{kha}$VO$_1$  **7 तदग्रहे** ] C$_1$C$_2$P$_1$; **तदग्रहणे** MB$_1$  **7 न त्व॰** ] MB$_1$C$_1$C$_2$P$_1$; **न चा॰** V; **न च** O$_1$  **8 ॰लब्धाववयवीति** ] MVB$_1$C$_2$O$_1$P$_1$; **॰लब्धायमिति** C$_1$  **8 स तेभ्यो** ] MC$_1$C$_2$P$_1$; **एतेभ्यो** VB$_1$O$_1$  **8 भिद्येत** ] MP$_1$; **भिद्यते** VB$_1$C$_2^{pc}$O$_1$; **भिद्येतः** C$_1$; **भिद्येद्यत** C$_2^{ac}$  **10 सर्वे** ] VB$_1$C$_1$C$_2$O$_1$P$_1$; **सर्वैं** M  **10 तदवयवाः** ] MVC$_1$C$_2$O$_1$P$_1$; **तदवयवः** B$_1$  **10 ग्रहीतुम्** ] VB$_1$C$_1$C$_2$O$_1$P$_1$; **ग्रहीतुंम्** M

अर्वाग्भागवर्तिन एव गृह्येरन् न मध्यपरभागगता इति।

### [5.1.4 बुद्ध्या विविच्यमान अनुपलम्भात्]

बुद्ध्या विविच्यमाने चानुपलम्भात्। यदा हि पटं पाणौ निधाय बुद्ध्या विविनक्ति "एष तन्तुः" "एष तन्तुः" इति, तदा प्राच्या-दञ्चलात्प्रभृति प्रतीचीनमञ्चलं यावद् विविञ्चन्नसौ तन्तुसन्ततिमेव केवलामुपलभते, न ततो ऽतिरिक्तं पटावयविनम्।

---

**1** Vasubandhu's *Viṃśikāvṛtti* ad 15: **अर्वाग्भागस्य च ग्रहणं परभागस्य चाग्रहणं युगपन्न स्यात्।**
**3** *Nyāyasūtra* 4.2.26: **बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः॥**; *Nyāyabhāṣya* ad 4.2.26 (Thakur 271.8–10): **यथायं तन्तुरयं तन्तुरिति प्रत्येकं तन्तुबुद्ध्या विविच्यमानेषु नार्थान्तरं किंचिदुपलभ्यते यत्पटबुद्धेर्विषयः स्यात्, याथात्म्यानुपलब्धेरसति विषये पटबुद्धिर्भवन्ती मिथ्याबुद्धिर्भवति, एवं सर्वत्रेति।**; *Abhidharmakośabhāṣya* ad 6.4 (Pradhan 334.3–4): **यस्मिन्नवयवशो भिन्ने न तद्बुद्धिर्भवति, तत् संवृतिसत्, तद्यथा घटः। तत्र हि कपालशो भिन्ने घटबुद्धिर्न भवति।**; Cf. NM I 622.9–12: **समुदायबुद्धौ हि विभज्यमानायां समुदायिन एव स्फुरन्ति, नावयविवदर्थान्तरम्।**

---

**1 अर्वाग्भाग॰** ] MV$B_1^{pc}O_1P_1$ ; **अर्भाग्भाव॰** $B_1^{ac}$ ; **अप्राग्भाग॰** $C_1$ ; **अप्राग्भाव एव** $C_2$  **1 ॰वर्तिन** ] MV$C_1C_2O_1P_1$ ; **॰वतिन** $B_1$  **1 मध्य॰** ] MV$O_1P_1$ ; **मध्यम॰** $B_1$ ; **सव्य॰** $C_1$ ; ++ $C_2$  **1 ॰गता** ] MV$C_1C_2O_1P_1$ ; **॰रता** $B_1$ **3 विविच्यमाने चानुपलंभात्। यदा हि पटं पाणौ निधाय बुद्ध्या विविनक्ति** ] $P_1$ ; **विभज्यमाने चानुपलम्भात्। यदा हि पटं पाणौ निधाय बुध्या विविनाक्ति** M; **विविनाक्ति** $M^{kha}$ ; **विविनक्ति** V$O_1$ ; **विविच्यमाने चानुपलंभात्॥ यदा हि घटं पाणौ निधाय बुद्ध्या विविनक्ति** $B_1$ ; **विभज्यमाने चानुपलंभात् यथा हि पटं पाणौ निधाय बुद्ध्या विविनक्ति** $C_1$ ; **विभज्यमाने चानुपलंभात् यदा हि पटं पाणौ निधाय बुद्ध्या विविनक्ति** $C_2$  **4 "एष तन्तुः" "एष तन्तुः" इति** ] MV$B_1C_1C_2O_1$ ; **एष तन्तुरिति** $P_1$  **5 प्रतीचीन॰** ] V$B_1C_1C_2O_1P_1$ ; **प्रतिचीन॰** M  **5 विविञ्चन्नसौ** ] V$O_1P_1$ ; **विविंचयन्नसौ** M; **विविंचिन्नसौ** $B_1$ ; **विविन्तयन्नसौ** $C_1$ ; **विविन्तत्वनन्नसौ तु+न** $C_2$  **5 तन्तु॰** ] MV$B_1C_2O_1P_1$ ; **सन्तु॰** $C_1$ **6 न ततो** ] MV$B_1C_2O_1P_1$ ; **ततो** $C_1$  **6 ऽतिरिक्तं** ] M$B_1O_1P_1$ ; **ऽतिरिक्त॰** V$C_1$ ; **रिक्त॰** $C_2$  **6 पटा॰** ] MV$C_1C_2O_1P_1$ ; **घटा॰** $B_1$  **6 ॰वयविनम्** ] MV$B_1O_1P_1$ ; **॰वयविनः** $C_1C_2$

### [5.1.5 वृत्त्यनुपपत्तेः]

वृत्त्यनुपपत्तेश्च।

### [5.1.5.1 न कार्त्स्न्येन]

नैकत्रावयवे कार्त्स्न्येनावयवी वर्तते, तदन्येष्ववृत्तिप्रसङ्गात्।

### [5.1.5.2 नैकदेशेन]

नैकदेशेन वर्तते, स्वारम्भकावयवव्यतिरिक्तैकदेशाभावात्। अभ्युपगमे वानवस्थाप्रसङ्गात्। यैरप्येकदेशैरवयवेष्वसौ वर्तते, तेष्वपि कथं वर्तेत, अन्यैरेकदेशैः, तेष्वप्यन्यैरिति नास्त्यन्तः। असंबद्धस्त्वेक-

---

**2** Cf. NM *apoha* I section 4.1 (Kataoka 2011:614(23).7–9): न, वृत्त्यनुपपत्तेः। किं प्रतिपिण्डं कार्त्स्न्येन वर्तते जातिर् उतैकदेशेनेति। द्वयं चानुपपन्नम्।

**4** Cf. *Nyāyabhāṣya* ad 4.2.8 (Thakur 262.11): न तावत् प्रत्यवयवं वर्तते, तयोः परिमाणभेदाद् द्रव्यस्य चैकद्रव्यत्वप्रसङ्गात्।; NM *apoha* I section 4.1 (Kataoka 2011:613(24).1–2): पिण्डे सामान्यमेकत्र यदि कार्त्स्न्येन वर्तते। तत्रैवास्य समाप्तत्वान्न स्यात् पिण्डान्तरे ग्रहः॥

**6** Cf. *Nyāyabhāṣya* ad 4.2.8 (Thakur 262.12): नाप्येकदेशैः, सर्वेष्वन्यावयवाभावात्।

---

**2 वृत्त्यनुपपत्तेश्च** ] $MVB_1O_1P_1$; प्रवृत्त्यनुपपत्तेः $C_1C_2$ **4 कार्त्स्न्येना॰** ] $MVC_1C_2O_1P_1$; कार्त्येना॰ $B_1$ **4 तदन्ये॰ ··· तेष्वपि** ] $MB_1C_1C_2O_1P_1$; तेष्वपि $M^{kha}V$ **4 ॰ष्ववृत्तिप्रसङ्गात्** ] $MB_1O_1P_1$; तिप्रसंगात् $C_1C_2$ **6 स्वारम्भका॰** ] $B_1C_1C_2O_1P_1$; स्वारम्भा॰ M **6 ॰वयव॰** ] $MP_1$; ॰वय॰ $B_1O_1$; ॰वयवे $C_1$; ॰वयवि॰ $C_2$ **6 ॰क्तैकदेशा॰** ] $O_1P_1$; ॰क्तदेशा॰ $MC_1C_2$; ॰क्तैकेदशा॰ $B_1$ **6 ॰भावात्। अभ्यु॰** ] $MC_1C_2P_1$; ॰भावाभ्यु॰ $B_1O_1$ **7 वानवस्था॰** ] $MB_1C_1C_2P_1$; वांतनवस्था॰ $O_1$ **7 ॰प्येकदेशैर॰** ] $MB_1C_1C_2P_1$; ॰प्येकदेशो $O_1$ **8 वर्तेत** ] $P_1$; वर्तत M; वर्तते $VB_1C_1C_2O_1$ **8 तेष्वप्यन्यैरिति** ] $MVB_1O_1P_1$; तेष्वन्यैरिति $C_1C_2$ **8 ॰स्त्यन्तः** ] $MB_1C_1C_2P_1$; ॰स्त्यन्यः $VO_1$ **8 असंबद्ध॰** ] $MVC_1C_2O_1P_1$; असंबंध॰ $B_1$

देशैरवयवी कथं तद्द्वारेण स्वारम्भकैरपि संबध्येत।

[5.1.5.3 उपसंहारः]

तस्मादुभय्यपि नास्य वृत्तिरवयवेष्वस्तीति।

[5.1.6 अनैकान्तिकम्]

धारणाकर्षणादि त्वनारब्धकार्ये काष्ठमूलककर्पासादावपि दृश्यत इत्यनैकान्तिकम्।

[5.1.7 वनवत्]

एकाकारा तु प्रतीतिर्विकल्पमात्रम्। एकदेशावस्थानादिनिमित्तमाश्रित्य

(१) करितुरगपदातिप्रभृतिष्विव “सेना” इति

---

**5 धारणाकर्षणादि त्व°** ] *Nyāyamañjarīgranthibhaṅga* 225.1–2: **धारणाऽऽकर्षणादि त्विति। एकस्यावयवस्य धारणे सर्वस्य धारणमेकस्य चाऽऽकर्षणे सर्वस्याऽऽकर्षणमसत्यवयविनि न स्यादिति।**
**5** *Nyāyasūtra* 2.1.35: **धारणाकर्षणोपपत्तेश्च॥**; *Nyāyabhāṣya* ad 2.1.35 (Thakur 76.6): **द्रव्यान्तरानुत्पत्तौ च तृणोपलकाष्ठादिषु जतुसंगृहीतेषु नाभविष्यतामिति।**
**5 काष्ठ°** ] *Nyāyamañjarīgranthibhaṅga* 225.2–3: **काष्ठेति काष्ठ[मूल]केऽनारब्धकार्यत्वम् अन्त्यावयवि(वा)नामनारम्भकत्वात्।**

---

**1 °स्त्वेकदे°** ] MVB$_1$C$_1$O$_1$P$_1$; **°स्त्वैकदे°** C$_2$ **1 °रवयवी** ] MC$_1$C$_2$P$_1$; **°रवयवेष्वस्तीति** V; **°रोवयवे** B$_1$; **°रवयवे** O$_1$ **1 तद्द्वारेण स्वारम्भकैरपि** ] P$_1$; **तद्द्वारेण स्वारम्भकैरपि** MC$_1$C$_2$; **तद्द्वारकैरपि** M$^{kha}$VB$_1$O$_1$ **3 °त। तस्मादु° ··· मूलककार्पा°** ] om. O$_1^{ac}$ **3 °य्यपि नास्य** ] MVO$_1^{pc}$P$_1$; **°यप्य नास्ति** B$_1$; **°य्यपि नास्ति** C$_1$C$_2$ **3 °वयवेष्वस्तीति** ] VB$_1$O$_1^{pc}$P$_1$; **°वयवेष्विति** MC$_1$C$_2$ **5 धारणा°** ] MVB$_1$C$_1$C$_2$P$_1$; **वारणा°** O$_1^{pc}$ **5 °कर्षणादि** ] MC$_1$C$_2$O$_1^{pc}$P$_1$; **°कर्षादि** V; **°कषणादि** B$_1$ **5 त्वनारब्ध°** ] MVB$_1$O$_1^{pc}$P$_1$; **त्वन्तरब्ध°** C$_1$; **त्वन्तन्नब्ध°** C$_2$ **5 °मूलककर्पासादावपि** ] B$_1$O$_1^{pc}$P$_1$; **°मूलककार्पासादावपि** MV; **°मूलकादावपि** C$_1$C$_2$; **°सादावपि** O$_1^{ac}$ **8 प्रतीतिर्वि°** ] MVB$_1$C$_1$C$_2$P$_1$; **प्रतीति वि°** O$_1$ **10 करि°** ] MVC$_1$C$_2$O$_1$P$_1$; **कारि°** B$_1$ **10 °तिप्रभृतिष्विव** ] MC$_1$C$_2$P$_1$; **°तिष्विव** VB$_1$O$_1$

(२) धवखदिरपलाशादिष्विव “वनम्” इति संचितेष्ववयवेष्वेव “घटः” इत्यादिप्रतीतिर्भविष्यति—इत्येवम् अवयव्यवयवावयवपर्यालोचनयाणुसंचयमात्रमेवावशिष्यते नान्यत्।

[5.1.8 संचयविचारः]

संचयो ऽपि च व्यतिरिक्ताव्यतिरिक्ततया चिन्त्यमानो नास्त्येवेत्यणव एवावशिष्यन्ते।

[5.1.9 परमाणुनिरासः]

परमाणवो ऽपि—

---

**2** Cf. *Nyāyabhāṣya* ad 2.1.36 (76.14–15): **यथा सेनाङ्गेषु वनाङ्गेषु चारादगृह्यमाणपृथक्त्वेषु “एकमिदम्” इत्युत्पद्यते बुद्धिः, एवमणुषु संचितेष्वगृह्यमाणपृथक्त्वेषु “एकमिदम्” इत्युपपद्यते बुद्धिरिति।**

---

**1 “वनम्” इति** ] $MVB_1O_1P_1$ ; **नति** $C_1C_2$  **2 घटः” इ॰** ] $VB_1C_1C_2O_1P_1$ ; **घठ इ॰** M  **2 ॰प्रतीति॰** ] $M^{kha}VB_1O_1P_1$ ; **॰बुद्धि॰** $MC_1C_2$  **3 ॰त्येवमवयव्यवयवावयव॰** ] $VB_1P_1$ ; **॰त्येवावयवावयव॰** M ; **॰त्येवमवयव्यवयवावयवा॰** V ; **॰त्येवमवयवावयव॰** $C_1$ ; **॰त्येवमवयावयव॰** $C_2$ ; **॰त्येवमयवावयव॰** $O_1$  **3 ॰मात्रमेवाव॰** ] $MVB_1C_2O_1P_1$ ; **॰मात्रवेवा॰** $C_1$  **3 नान्यत्** ] $MVB_1O_1P_1$ ; **नान्य** $C_1C_2$  **5 ऽपि च** ] $MVB_1O_1P_1$ ; **पि** $C_1C_2$  **5 ॰रिक्ततया** ] $MVB_1C_1C_2P_1$ ; **॰रिक्तेतया** $O_1$  **8 परमाणवो ⋯ परमाणोः** ] $MVC_1C_2P_1$ ; **परामाणवो ⋯ परमाणा** $B_1$ ; **परमाण** $O_1$(eyeskip)

षट्केन युगपद्योगात् परमाणोः षडंशता॥

इत्येवं विकल्प्यमाना विप्लवन्त एव। न च तैरतिसूक्ष्मैरेष व्यवहारोऽभिनिर्वर्त्यत इति।

[5.1.10 उपसंहारः]

तस्माद्बाह्यस्य प्रमेयस्य निरूप्यमाणस्यानुपपत्तेर्विज्ञानमात्रमेवेदमित्यभ्युपगमनीयम्।

[5.2 उत्तरपक्षः]

ते ऽप्येवं वदन्तः प्राक्तनेभ्यो ऽपि भिक्षुभ्यः कृपणतरा इव लक्ष्यन्ते। अपूर्व एष तर्कमार्गो यत्र प्रतीतिमुत्सृज्य तर्जनीविस्फोटनेन वस्तुव्यवस्थाः क्रियन्ते।

---

**1** Vasubandhu's *Viṃśikā* 12ab; *Nyāyamañjarīgranthibhaṅga* 225.3–9: **षट्केन युगपद्योगादित्यस्योत्तरमर्धम्—[तेषां] समानदेशत्वे पिण्डः स्यादणुमात्रकः॥ [विज्ञप्तिमात्रताविंशतिका १२] इति॥ दिक्चतुष्टयादूर्ध्वभागादधोभागाच्चागतैः परमाणुभिरेकस्य परमाणोरवश्यं योगो वक्तव्योऽन्यथा सञ्चयाभावाद्। तत्र भिन्नैर्भागैर्योगः परमाणोः। सावयवत्वात् तस्यान्येऽवयवाः कल्प्याः, तेषामपि कल्पितावयवानां परस्परमयमेव न्याय इत्यनवस्था। अथ निर्भागत्वात् परमाणोर्यथैकेन सम्बन्धस्तथाऽपरेणापीति, तदेवमेकदेशत्वादणुमात्रपरिमाणस्तत्सञ्चयः स्यादित्यर्थः।**

---

**1 षट्केन युगप॰** ] $MVB_1C_1C_2^{pc}P_1$ ; **युगपत् षट्केन युगप॰** $C_2^{ac}$(unmetrical) **1 ॰माणोः** ] $MVC_1C_2P_1$ ; **॰माणा** $B_1$ ; **॰माण** $O_1$ **1 षडंशता॥ इत्ये॰** ] $MVB_1P_1$ ; **षडंगमित्ये॰** $C_1C_2$(unmetrical) ; **ष्पडंशतेत्ये॰** $O_1$ **2 विप्लवन्त एव। न च** ] lacuna $C_2$ **2 व्यवहारो ऽभिनिर्वर्त्यत** ] $MVB_1C_1C_2P_1$ ; **व्यवहारे भिनिर्वत्यत** $O_1$ **5 प्रमेयस्य** ] $C_1C_2$ ; **प्रमेयस्यैव** $MVB_1O_1P_1$ **5 ॰पपत्तेर्वि॰** ] $MVC_1C_2P_1$ ; **॰पपत्ते वि॰** $B_1O_1$ **6 ॰मात्रमेवेदमित्य॰** ] $MVB_1O_1P_1$ ; **॰मात्रमेवेत्य॰** $C_1C_2$ **6 ॰मनीयम्** ] $MVB_1C_2^{ac}O_1^{pc}P_1$ ; **॰मनीयमिति** $C_1C_2^{pc}$ ; **॰नीयं** $O_1^{ac}$ **8 ऽप्येवं** ] $MVB_1C_1C_2P_1$ ; **प्येवे** $O_1$ **8 वदन्तः** ] $MVC_1C_2O_1P_1$ ; **विदंतः** $B_1$ **8 कृपणतरा** ] $MVC_1O_1P_1$ ; **कृपणतारा** $B_1$ ; **कृपणत+** $C_2$ **8 ॰रा इव लक्ष्यन्ते। अपूर्व एष तर्क॰** ] lacuna $C_2$ **9 अपूर्व** ] $VC_1O_1P_1$ ; **अपूर्वं** $MB_1$ **9 एष** ] $MVB_1O_1P_1$ ; **एव** $C_1$

दृढेन चेत् प्रमाणेन बाधादिरहितात्मना।
गृहीत एवावयवी, किमेभिर्बालवल्गितैः॥
अथ नास्ति प्रमाणेन केनचित्तदुपग्रहः।
एतदेवोच्यतां, वृत्तिविकल्पैः किं प्रयोजनम्॥

न च शक्नुमः पदे पदे वयमेभिरभिनवमल्पमपि किंचिदपश्यद्भिस्तदेव पुनः पुनः प्रकुर्वद्भिः शाक्यहतकैः सह कलहमतिमात्रं कर्तुम्।

[5.2.1 अवयवी प्रत्यक्षसिद्धः]

सविकल्पकं प्रत्यक्षं प्रमाणमिति साधितम्। निर्विकल्पकेनापि शब्दोल्लेखमात्ररहितं सविकल्पकग्राह्यमेव वस्तु गृह्यत इति दर्शित-

---

**1** Cf. NM *vijñānādvaita* section 5.2.6.

**6** Cf. NM II 348.18–349.1: **न चास्तित्वाविनाभावी भावानां विनाशः स्वाभाविकः किंतु हेत्वन्तरनिमित्तक इति सौगतैः सह कलहमतिमात्रमधुनैव कृत्वा समर्थितो ऽयमर्थः।**

**8 साधितम्** ] NM I 224.21–22: **निर्विकल्पकवत् तस्मात् प्रत्यक्षं सविकल्पकम्। समग्रहीच्च तदिदं पदेनानेन सूत्रकृत्॥**

---

**1 प्रमाणेन** ] $MVB_1C_2O_1P_1$; **प्रमाणे** $C_1$ **2 किमेभिर्बालवल्गितैः** ] $MVC_1C_2O_1P_1$; **किमभिर्भालवल्गितैः** $B_1$ **3 °माणेन केनचित्त° ··· पदे पदे** ] lacuna $C_2$ **4 °च्यतां** ] $MVB_1C_1P_1$; **°दितां** $O_1$ **5 शक्नुमः** ] $VB_1C_1O_1P_1$; **शक्नुयः** M **5 °नवमल्पमपि** ] $MVB_1C_1C_2P_1$; **°नवल्पमपि** $O_1$ **5 किंचिदप°** ] $MVB_1C_1C_2P_1$; **किंचिदपि°** $O_1$ **6 प्रकुर्वद्भिः** ] $M^{kha}VO_1P_1$; **पृच्छद्भिः** $MC_1C_2$; **पूत्कुर्वद्भिः** $B_1$ **6 °हतकैः** ] $MB_1C_1C_2P_1$; **°नर्तकैः** $M^{kha}V$; **°नतकैः** $O_1$ **6 सह कलहमतिमात्रं कर्तुम् ··· °ग्राह्यमेव वस्तु** ] lacuna $C_2$ **6 कलह°** ] $MVC_1O_1P_1$; **कलहै°** $B_1$ **6 °तिमात्रं** ] $MVC_1O_1P_1$; **°तिपात्रं** $B_1$ **8 सविकल्पकं** ] $MC_1P_1$; **अविकल्पकं** $M^{kha}V$; **सविकल्पं** $B_1O_1$ **8 प्रत्यक्षं** ] $MVB_1O_1P_1$; om. $C_1$ **9 °तं सविकल्पक°** ] $MB_1P_1$; **°तमविकल्पक°** V; **°तः सविकल्प°** $C_1$; **°तमविकल्प°** $O_1$ **9 इति** ] $VB_1O_1P_1$; **इति च** $MC_1C_2$

म्। एकाकारविषयव्यतिरेकेण तद्बुद्धेरेककार्यत्वैकदेशावस्थानाद्यन्यथासिद्धिनिबन्धनमपि न किंचिद्वक्तुं शक्यत इत्युपवर्णितम्। क्वचिद्वा पृतनादौ बाधकोपनिपाताद् एकावगतिमिथ्यात्वान्न सर्वत्र मिथ्यात्वकल्पना युक्तेत्यप्युक्तम्। किं वा तदस्ति यत् सामान्यसमर्थनावसरे

---

**1 दर्शितम्** ] NM I 256.6–7: **तस्माद्य एव वस्त्वात्मा सविकल्पस्य गोचरः। स एव निर्विकल्पस्य शब्दोल्लेखविवर्जितः॥**
**2 इत्युपवर्णितम्** ] NM *apoha* IV, section 3.4.5.4 (Kataoka 2010:177(104).5–8): **अपि च, रे मूढ, सामान्यानभ्युपगमे कुतस्त्य एकाकारविकल्पोत्पाद इति पर्यनुयुक्तेन त्वया कार्यैक्यादित्युत्तरमुक्तम्। कार्यैक्यं कुत इति च पृष्टेन विकल्पैक्यादित्युच्यते, तदेतदितरेतराश्रयं भवति—कार्यैक्याच्च विकल्पैक्यं विकल्पैक्याच्च कार्यैक्यमिति।**; 3.2.2 (Kataoka 2010:192(89).6–191(90).1): **यत्तु "देशभेदेनाग्रहणात्" "तदग्रहे तद्बुद्ध्यभावात्" इति, तत्र तदाश्रितत्वं कारणं जातेः, नासत्त्वम्। व्यक्तिवृत्तित्वाज्जातेः पृथग्देशतयानुपलम्भस् तदग्रहे, न पुनस् तदतिरिक्ताया अभावादिति।**
**4 °प्युक्तम्** ] NM *apoha* IV, section 3.4.4 (Kataoka 2010:182(99).7–181(100).3): **न चाषेण पञ्चाशद् भवितुमर्हति। यदि हि सेनावनादिप्रत्ययाः करितुरगधवखदिरादिव्यतिरिक्तमर्थमनपेक्ष्य जायमाना मिथ्या भवन्ति, किमेतावता घटादिप्रत्ययैरपि मिथ्या भवितव्यम्। बाधकसदसद्भावनिबन्धना हि वैतथ्यावैतथ्यस्थितिः प्रत्ययानाम्।**
**4 सामान्यसमर्थनावसरे** ] See NM *apoha* IV (Kataoka 2010).

---

**1 °ण** ] $C_1C_2$; **°ण च** $MVO_1P_1$; **°न च** $B_1$ **1 °त्वैक°** ] $MVB_1C_1O_1P_1$; **°त्वेक°** $C_2$ **1 °देशावस्थानाद्य°** ] $C_1C_2P_1$; **°देशाद्य°** M; **°देशव्यवस्थानाद्य°** $VB_1O_1$ **2 °निबन्धन°** ] $M^{kha}VB_1O_1P_1$; **°निबन्धनत्व°** $MC_1C_2$ **2 °मपि न किंचिद्वक्तुं ··· एकावगति°** ] lacuna $C_2$ **2 न किंचिद्वक्तुं** ] $MVB_1P_1$; **किञ्चिद्वक्तुन्न** $C_1$; **न किंचिद्वक्तु** $O_1$ **2 शक्यत** ] $MVB_1O_1P_1$; **शक्य** $C_1$ **2 इत्युपवर्णितम्** ] $VB_1O_1P_1$; **इत्यपि वर्णितम्** M; **इत्यपि निर्णीतं** $C_1$ **3 पृतनादौ** ] $M^{kha}VB_1O_1P_1$; **पृतनावनादौ** $MC_1$ **3 °कोप°** ] $MVC_1O_1P_1$; **°कोपि°** $B_1$ **3 °ताद् एका°** ] $MB_1C_1P_1$; **°तादेवा°** V; **°तादेगा°** $O_1$ **3 मिथ्यात्वान्न सर्वत्र मिथ्यात्व°** ] $MVB_1C_1C_2P_1$; **मिथ्यात्व°** $O_1$(eyeskip) **4 युक्तेत्यप्युक्तम्। किं वा तदस्ति** ] $MVB_1P_1$; **युक्तेत्य␣␣दस्ति** $C_1$; **युक्तेत्य++स्ति** $C_2$; **°या युक्तेत्यप्युक्तं किं वा तदस्ति** $O_1$

न कथितम्। तस्मात् तयैव नीत्यावयव्यपि सिद्ध एव, तद्ग्राहिणः प्रत्यक्षस्य निरपवादत्वात्।

[5.2.2 अवयवाश्रितत्वम्]

यत्तु “देशभेदेनाग्रहणात्” “तदग्रहे तद्बुद्ध्यभावात्” इति, तत्रावयवाश्रितत्वमेव निमित्तम्, नासत्त्वम्।

देशभेदेन हि ज्ञानं तद्देशस्य कथं भवेत्।
न हि कश्चित् स्वतन्त्रो, ऽसावपि त्ववयवाश्रितः॥

[5.2.3 न सर्वावयवग्रहणम्]

यावतां ग्रहणे चास्मिन् बुद्धिर्भवति, तावताम्।
अपेक्षते ऽसौ ग्रहणं न सर्वेषामिति स्थितिः॥

[5.2.4 अवयवविभागेनावयविविनाशः]

विविच्यमानेष्वंशेषु युक्तस्तदनुपग्रहः।

---

**4** See NM *vijñānādvaita* section 5.1.1 and 5.1.2.
**5** Cf. *Nyāyabhāṣya* ad 4.2.28 (Thakur 272.3): **कार्यद्रव्यं कारणद्रव्याश्रितं तत्कारणेभ्यः पृथङ्नोपलभ्यते।**
**9** See NM *vijñānādvaita* section 5.1.3.
**10** Cf. *Nyāyabhāṣya* ad 2.1.32 (Thakur 74.9–10): **अकृत्स्नग्रहणादिति चेत्। न, कारणतो ऽन्यस्यैकदेशस्यासंभवात्। न चावयवाः कृत्स्ना गृह्यन्ते, अवयवैरवयवान्तरव्यवधानात्।**
**12** See NM *vijñānādvaita* section 5.1.4.

---

**1 न कथितम्** ] $VC_1C_2$ ; **नाकथितम्** $MO_1$ ; **॰णाकल्पितं** $B_1$ ; **नो कथितम्** $P_1$
**1 तयैव** ] $MVC_1C_2O_1P_1$ ; **त्वयैव** $B_1$ **1 सिद्ध एव ··· तद्बुद्ध्यभा॰** ] lacuna $C_2$
**4 तद्बुद्ध्यभा॰** ] $MVB_1C_1P_1$ ; **तद्बुद्ध्याभा॰** $O_1$ **5 तत्रावयवा॰** ] $MVB_1C_1O_1P_1$ ; **तत्रावयववा॰** $C_2$ **6 तद्देशस्य** ] $MB_1C_1C_2P_1$ ; **तत्त्वे तस्य** $M^{kha}V$ ; **तत्वेशस्य** $O_1$ **7 स्वतन्त्रो** ] $MVB_1C_1P_1$ ; **स्वतन्त्रा॰** $O_1$ **7 ऽसावपि ··· तावताम्। अपे॰** ] lacuna $C_2$ **7 त्ववयवा॰** ] $MVC_1O_1P_1$ ; **त्ववया॰** $B_1$(unmetrical)
**9 ग्रहणे** ] $VB_1C_1O_1P_1$ ; **ग्रहणो** M **9 चास्मिन्** ] $VB_1O_1P_1$ ; **ऽप्यस्मिन्** $MC_1$
**10 न** ] $MVB_1O_1P_1$ ; **नो** $C_1C_2$ **10 स्थितिः** ] $MVB_1C_1O_1P_1$ ; **स्थितः** $C_2$
**12 ॰ष्वंशेषु** ] $MVB_1C_2O_1P_1$ ; **॰ष्वंगेषु** $C_1$

तदावयविनाशो हि बुद्धौ विपरिवर्तते॥

अवयवविभागो ह्यवयविनो विभागहेतुः। तस्मिन् बुद्ध्या समुल्लिख्यमाने ऽवयविविनाशो नानुल्लिखितो भवेदिति कथमवयवी तदानीं गम्येत।

### [5.2.5 वृत्तेः प्रत्यक्षेणोपलब्धिः]

वृत्तिश्चावयवेष्वस्य व्यासज्यैवेति गम्यते।
न प्रत्यवयवं तस्य समाप्तिर्व्यक्तिजातिवत्॥
व्यासज्य वर्तमानो ऽपि न खल्ववयवान्तरैः।

---

**2** *Āgamaḍambara* I 166 (74.15–17): **न च नास्ति विनाशकारणम्, अवयविनामवयवविभागादेरवश्यंभावित्वात्।**; *Nyāyasūtra* 3.2.12: **नोत्पत्तिविनाशकारणोपलब्धेः॥**; *Nyāyabhāṣya* ad 3.2.12: **विनाशकारणं चोपलभ्यते कुम्भादीनामवयवविभागः।**
**3 ऽवयविविनाशो ऽपि नानुल्लिखितो भवेदि°** ] *Nyāyamañjarīgranthibhaṅga* 225.10: **अवयविविनाशोऽपि नानुल्लिखितो भवेद् अवयवविभागहेतुत्वात् तन्नाशस्य।**
**6** See NM *vijñānādvaita* section 5.1.5.
**6 वृत्तिश्चावयवेष्वस्य व्यासज्यैवेति** ] But cf. *Nyāyamañjarīgranthibhaṅga* 225.11: **वृत्तिश्च व्यासज्यैवेति। कात्स्न्र्येन सकलावयवेषु न, एकैकपरिसमाप्त्या।**
**7** See NM *vijñānādvaita* section 5.1.5.
**8** See NM *vijñānādvaita* section 5.1.5.

---

**1 बुद्धौ वि°** ] $MVC_1O_1P_1$; **बुद्धाव°** $B_1$; **बु++** $C_2$ **1 °परिवर्तते ⋯ बुद्ध्या स°** ] lacuna $C_2$ **2 अवयव°** ] $VB_1C_1O_1P_1$; **अवयवव°** M **2 ह्यवयविनो** ] $MVC_1O_1P_1$; **ह्यवयव°** $B_1^{ac}$; **ह्यवय°** $B_1^{pc}$ **2 विभाग°** ] $M^{kha}VC_1O_1P_1$; **विनाश°** M; **विभागो** $B_1$ **2 बुद्ध्या** ] $MVB_1O_1P_1$; **बुद्ध्यास्** $C_1$ **3 समुल्लिख्यमाने** ] $MVC_2P_1$; **समुल्लिख्यमानो** $B_1O_1$; **समुल्लिख्यःमाने** $C_1$ **3 ऽवयविविनाशो** ] $MVB_1O_1P_1$; **वयविनाशो** $C_1C_2$ **3 नानु°** ] $C_1C_2$; **ऽपि नानु°** $MVB_1O_1P_1$ **3 कथमवयवी** ] $MVC_1C_2O_1P_1$; **कथमेवयवी** $B_1$ **4 °नीं गम्येत** ] $MB_1P_1$; **°नीं गम्यते** $VO_1$; **°नीमवगम्येत** $C_1C_2$ **6 °वेष्वस्य** ] $MVC_1O_1P_1$; **°वीष्वस्य** $B_1$; +++ $C_2$ **6 व्यासज्यैवेति ⋯ °क्तिजातिवत्॥ व्यास°** ] lacuna $C_2$ **6 व्यासज्यैवेति** ] $MVC_1O_1P_1$; **वासज्यैवेति** $B_1$ **7 °तिर्व्य°** ] $MVC_1O_1P_1$; **°तिव्य°** $B_1$ **8 व्यासज्य** ] $MVC_1O_1P_1$; **वासज्य** $B_1$; **++ज्य** $C_2$ **8 ऽपि** ] $VB_1O_1P_1$; **हि** $MC_1C_2$

वर्तते, तदसंवित्तेः, किं तु वर्तत एव सः॥
तथा चाहुः—वर्तत इति ब्रूमः, अनाश्रितस्यानुपलंभात्॥
वृत्तिरेवंविधान्यत्र क्क दृष्टेति यदुच्यते।
प्रत्यक्षदृष्ट एवार्थे दृष्टान्तान्वेषणेन किम्॥

तस्मात्प्रत्यक्षत एवावयववृत्तेरवयविन उपलब्धेर्न तद्वृत्तौ विकल्पानामवसरः। स्रक्सूत्रादिवृत्तिरपि तथा दर्शनादभ्युपगता। तदियमवयववृत्तिरपीदृशी दृश्यमाना किमिति निह्नूयते।

[5.2.6 न प्रत्यक्षस्य मिथ्यात्वम्]

न चावयविग्राहिणः प्रत्यक्षस्य कश्चिदपवादः समस्ति।
अदुष्टकारणोद्भूतमनाविर्भूतबाधकम्।
असंदिग्धं च विज्ञानं कथं मिथ्येति कथ्यते॥

---

**5** Cf. NM *apoha* IV section 3.2: यच्च वृत्तिविकल्पादिदूषणं तत्र वर्णितम्। तत्प्रत्यक्षमहिम्नैव सर्वं परिहृतं भवेत्॥

**6 स्रक्सूत्रादिवृत्ति°** ] See NM *apoha* IV section 3.2.7 (Kataoka 2010:188(93).6–7): ये चेह वृत्ती स्रक्सूत्रभूतकण्ठगुणादिषु। जात्यादीनामनङ्गत्वात् ताभ्यां वृत्तिर्विलक्षणा॥; cf. also *Ślokavārttika vana* 35.

**9** See NM *vijñānādvaita* section 5.1.6.

---

**2 तथा चाहुः ··· प्रत्यक्षदृष्ट एवा°** ] lacuna $\mathrm{C_2}$ **2 इति** ] $\mathrm{MC_1P_1}$; **एव** $\mathrm{M^{kha}VB_1O_1}$ **3 °रेवंविधा°** ] $\mathrm{MVB_1C_1O_1}$; **°रेवाविधा°** $\mathrm{P_1}$ **4 प्रत्यक्ष°** ] $\mathrm{MVC_1O_1P_1}$; **प्रत्य°** $\mathrm{B_1}$(unmetrical) **5 °रवयविन** ] $\mathrm{MVC_1O_1^{pc}P_1}$; **°रवयववृत्ति** $\mathrm{B_1}$; **°रवयवि**+$\mathrm{C_2}$; **°रवयवोन** $\mathrm{O_1^{ac}}$ **5 उपलब्धेर्न ··· निह्नूयते। न** ] lacuna $\mathrm{C_2}$ **5 उपलब्धेर्न** ] $\mathrm{MVC_1O_1P_1}$; **उपलब्धे न** $\mathrm{B_1}$ **6 स्रक्सूत्रा°** ] $\mathrm{MVB_1C_1P_1}$; **प्राक्सूत्रा°** $\mathrm{O_1}$ **6 °दिवृत्तिरपि** ] $\mathrm{MVB_1O_1P_1}$; **°दिरपि** $\mathrm{C_1}$ **7 तदियमवयव°** ] $\mathrm{B_1P_1}$; **तदियमवयवि°** $\mathrm{MVC_1O_1}$ **7 °रपीदृशी** ] $\mathrm{MVB_1C_1O_1^{pc}P_1}$; **अदुष्टकारणोद्भूतमनाविभूतवाधकं असंदिग्धं च विज्ञानं रपीदृशी** $\mathrm{O_1^{ac}}$ **7 दृश्यमाना** ] $\mathrm{MVC_1O_1P_1}$; **दृश्यमानाः** $\mathrm{B_1}$ **7 किमिति** ] $\mathrm{MVC_1P_1}$; **किमपि न** $\mathrm{B_1}$; **किमिति न** $\mathrm{O_1}$ **9 °णः** ] $\mathrm{MVB_1C_1P_1}$; **°णाः** $\mathrm{O_1}$ **9 °णः प्रत्यक्षस्य ··· °पलाशशिंशपादिदर्श°** ] lacuna $\mathrm{C_2}$ **9 °दपवादः** ] $\mathrm{MVB_1O_1P_1}$; **°दपराधः** $\mathrm{M^{ca}C_1}$ **10 °कारणो°** ] $\mathrm{MB_1C_1O_1P_1}$; **°करणो°** V **10 °र्भूत°** ] $\mathrm{MVC_1P_1}$; **°र्भूति°** $\mathrm{B_1}$; **°भूत°** $\mathrm{O_1}$

### [5.2.7 **दृष्टान्तस्य वैषम्यम्**]

**न च सेनादिवद् अवयविग्रहणमभिधातुमुचितम्, अबाधितत्वात्, सेनादौ च बाधकसंभवात्।**

### [5.2.8 **अवयवी प्रत्यक्षग्राह्यो ऽस्ति**]

**अपि च गजवाजिपदातिपीलुपलाशशिंशपादिदर्शनस्य तत्र घटमानत्वात् तत्समुदाये सेनावनप्रतीतिरुत्पद्येतापि। इह तु किंसमुदायविषयः पटप्रत्यय इति चिन्त्यम्।**

**तन्तुसमुदायालम्बन इति चेत्।**

**तन्तुप्रत्यय इदानीं किमालम्बनः।**

**सो ऽपि स्वावयवालम्बनः।**

---

**2** See NM *vijñānādvaita* section 5.1.7; cf. also *Ślokavārttika ākṛti* 20: **वनोपन्यासतुल्यो ऽयमुपन्यासः कृतस्त्वया। भ्रान्तित्वेन हि नैतस्या भ्रान्तिर्गोत्वादिधीरपि॥**
**5** See NM *vijñānādvaita* section 5.1.8.
**7 किंसमुदायविषयः** ] But cf. *Nyāyamañjarīgranthibhaṅga* 225.12: **किंसमुदायालम्बन इति। केषां समुदाय इति किंसमुदायः।**

---

**2 सेनादि॰** ] $M^{ca}C_1P_1$; **सेनावन॰** $MVO_1$; **सेवन॰** $B_1$ **2 ॰यविग्रहणमभिधातु॰** ] lacuna $C_1$ **3 ॰संभवात्** ] $VB_1C_1O_1P_1$; **॰सद्भावात्** M **5 ॰पदाति॰** ] $MVB_1O_1P_1$; **॰पादाति॰** $C_1$ **5 ॰पीलु॰** ] $MVB_1C_1P_1$; **॰पील॰** $O_1$ **6 तत्समुदाये** ] $C_1C_2P_1$; **तत्समवाये** $MVB_1O_1$ **6 सेनावनप्रतीति॰ … स्वावयवालम्ब॰** ] lacuna $C_2$ **6 सेनावनप्रतीतिरुत्प॰** ] $P_1$; **सेनावनादिप्रतीतिरुप॰** M; **सेनावनादिप्रतीतिरुत्प॰** $VB_1$; **सेनादिप्रतीतिरुत्प॰** $M^{ca}$; +++++++++ $C_1$; **सेनावनादिप्रतीतिरुत्पा॰** $O_1$ **6 ॰रुत्पद्येतापि** ] $VB_1O_1P_1$; **॰रुपपद्येतापि** M; ++**द्येतापि** $C_1$ **7 ॰विषयः** ] $MVB_1O_1P_1$; **॰विषयं** $C_1$ **10 सो ऽपि** ] $MVB_1O_1P_1$; **सो सो पि** $C_1$ **10 स्वावयवालम्बनः। इत्येवमवयवावयव॰** ] $MVP_1$; **स्वावयवालंबनं इत्येवमवयवावयव॰** $B_1$; **स्वावयवालम्**+++++++++**यवावयव॰** $C_1$; ++++++**न इतीत्येवमवयवावयव॰** $C_2$; **स्वावयवावयव॰** $O_1$ (eyeskip)

इत्येवमवयवावयवनिरूपणे परमाणवः पत्त्यश्वशमीशिंशपादिस्थानीया वक्तव्याः। तेषां च तद्वद् ग्रहणमनुपपन्नम्, अतीन्द्रियत्वात्—इति न तदालम्बनो ऽवयविप्रत्ययः। तस्मादवयवी प्रत्यक्षग्राह्यो ऽस्तीति सिद्धम्।

### [5.2.9 परमाणुसत्त्वम्]

परमाणवो ऽपि कार्यानुमानपरिनिश्चितनित्यनिरवयवस्वरूपाः सन्तीति पूर्वमेव समर्थितम्। अतो न षड्कयोगादिना सावयवत्वमेषामुपपादयितुं पार्यते। मूर्तत्वमप्यनित्यतायामप्रयोजकमिति दर्शयिष्यते।

---

**6** See NM *vijñānādvaita* section 5.1.9.

**7 समर्थितम्** ] NM II 419.18–420.11: **तथा हि पार्थिवम् आप्यं तैजसं वायवीयमिति चतुर्विधमिदं कार्यं स्वावयवाश्रितमुपलभ्यते। तत्र यथा घटः सावयवः कपालेष्वाश्रितः, एवं कपालान्यपि सावयवत्वात्तदवयवेषु, तदवयवा अपि तदवयवान्तरेषु—इत्येवं तावद् यावत् परमाणवो निरवयवा इति। यत्र यावतः कार्यजातस्य स्वावयवाश्रितस्य प्रत्यक्षेण ग्रहणं तत्र तदेव प्रमाणम्। तत ऊर्ध्वमनुमानम्। तदपि हि कार्यं स्वावयवाश्रितम्, सावयवत्वात्, परिदृश्यमानकार्यवत्। निरवयवत्वे (निरवयवत्वे** ] $C_1P_1$; **निरवयत्वे** M) **तु तस्य परमाणुत्वमेव। परमाणुषु च सावयवत्वहेतोर्** (**°त्वहेतोर्** ] $C_1P_1$; **°त्वस्य च हेतोर्** M) **असिद्धत्वान्नावयवान्तरकल्पना। तेषां हि सावयवत्वे तदवयवाः परमाणवो भवेयुः, न ते। … तद्यतः परमवयवविभागो न संभवति, ते परमाणव उच्यन्ते।**

**7 षड्कयोगादिना** ] See NM *vijñānādvaita* section 5.1.9.

**9 दर्शयिष्यते** ] *Nyāyamañjarī* II 625.19–626.1: **मूर्तत्वं हि सर्वगतेतरद्रव्य-**

---

**1 °शमी°** ] $MVB_1C_2O_1P_1$; **°शमीं** $C_1$ **2 °स्थानीया** ] $VB_1C_1C_2O_1P_1$; **°स्थानीय** M **2 तेषां च … तस्मादवयवी प्रत्य°** ] lacuna $C_2$ **3 न तदालम्बनो ऽवयवि°** ] lacuna $C_1$ **4 °ग्राह्यो ऽस्तीति** ] $MVC_1C_2O_1P_1$; **°बाधितं** $B_1$ **7 समर्थितम् … °नित्यतायामप्रयो°** ] lacuna $C_2$ **7 पूर्वमेव समर्थितम्। अ°** ] lacuna $C_1$ **7 षड्कयो°** ] $MVC_1P_1$; **षड्कोयो°** $B_1$; **षंकवो°** $O_1$ **7 सावयवत्व°** ] $MVP_1$; **सावयवित्व°** $B_1$; **सावयववत्व°** $C_1O_1$ **8 मूर्तत्वमप्य°** ] $MVO_1P_1$; **मूर्तत्वमपि** $B_1$; **मूर्त्तत्वम°** $C_1$

### [5.2.10 उपसंहारः]

अतः प्रमेयपर्यालोचनवर्त्मनापि न शून्यवादसमर्थनं सुशकम्। प्रमेयविचारे हि प्रमाणवृत्तमेव निरूप्यते। ततश्च प्रमाणचर्चातो बिभ्यद्भिः प्रपलाय्य या प्रमेयकथावीथी ताथागतैरवलम्बिष्यते, तस्यामपि सैव भीषणमुखी प्रमाणचर्चैवोपनता।

## [6 शून्यवादनिरासः]

### [6.1 बाह्यसिद्धिः]

सर्वतो विपदां मार्गमादेशयितुमुद्यते।
विधौ विधुरतां याते पलाय्य कुत्र गम्यते।
तस्मात्प्रमाणतो ऽशक्ये शक्ये वा वस्तुनिर्णये।

---

परिमाणविशेषादिधर्मो वस्तुस्वभावमात्रनिबन्धनो न कृतकत्वादिवद् अनित्यतां प्रयोक्तुमुत्सहते।

**10 तस्मात्प्रमाणतो ऽशक्ये** ] *Nyāyamañjarīgranthibhaṅga* 225.13–14: **तस्मात्**

---

**2 अतः प्रमेयपर्यालो॰** ] $MVC_2O_1P_1$; **ततः प्रमेयकार्यानुलो॰** $B_1$; +++++ ++++ $C_1$ **2 न शून्यवादसमर्थनं** ] $C_1C_2P_1$; **शून्यवादसमर्थनं न** $MV$; **न शून्यावादसमर्थनं** $B_1$; **शून्यवादसमर्थनं** $O_1$ **3 ॰विचारे** ] $MC_1C_2P_1$; **॰विचारो** $M^{kha}VB_1O_1$ **3 हि** ] $P_1$; **ऽपि हि** $MB_1C_1C_2$; **ऽपि** $VO_1$ **3 प्रमाण॰** ] $MB_1C_1C_2P_1$; **निष्प्रमाण॰** $M^{kha}V$; **निप्रमाण॰** $O_1$ **3 ॰मेव निरूप्यते ··· ताथागतै॰** ] lacuna $C_2$ **3 निरूप्यते** ] $M^{kha}VB_1O_1P_1$; **परीक्ष्यते** $MC_1$ **3 ततश्च** ] $VB_1O_1P_1$; **अतश्च** $MC_1$ **3 ॰चर्चातो** ] $MVB_1C_1P_1$; **चचातो** $O_1$ **3 बिभ्य॰** ] $MVB_1C_1P_1$; **बिभ्र॰** $O_1$ **4 ॰द्भिः प्रपलाय्य या प्रमे॰** ] $MP_1$; **॰द्भिः पलाय्य या प्रमे॰** $V$; **॰द्भिः पलाशय्या प्रमे॰** $B_1$; +++++++++ $C_1$; **॰द्भिः पलाश्यया प्रमे॰** $O_1$ **4 ॰वीथी** ] $MVC_1P_1$; **॰थीतरता** $B_1$; **॰वेथी** $O_1$ **4 ताथागतैर॰** ] $C_1^{pc}P_1$; **तथागतैर॰** $VB_1C_1^{ac}O_1$; **तथागतै॰** $M$; ++++**र॰** $C_2$ **4 ॰वलम्बिष्यते** ] $P_1$; **॰वलम्बिता** $MVB_1^{pc}C_1C_2O_1$; **॰वलंबिनता** $B_1^{ac}$ **5 ॰चर्चैवो॰** ] $M^{kha}VB_1O_1P_1$; **॰चर्चिकैवो॰** $MC_1C_2$ **8 सर्वतो** ] $VB_1C_1C_2O_1P_1$; **सर्वती** $M$ **8 ॰देशयितु॰** ] $MVP_1$; **॰देशयतु॰** $B_1O_1$; **॰दर्शयितु॰** $C_1C_2$ **9 विधौ विधुरतां या॰** ] $MVC_2O_1P_1$; **विधुर्विधुरतां या॰** $B_1$; +++++++++ $C_1$ **9 ॰ते पलाय्य कुत्र ··· वस्तुनिर्णये। ए॰** ] lacuna $C_2$ **9 पलाय्य कुत्र** ] $P_1$; **प्रपलाय्य क्व** $MVO_1$; **प्रपलाय क्व** $B_1$; **पलाय्य क्वानु॰** $C_1$ **10 शक्ये** ] $MVB_1C_1P_1$; **शक्यो** $O_1$

एवंप्रायमयुक्तं वः कुशकाशावलम्बनम्॥
तेन निष्फलमुत्सृज्य शून्यवादबकव्रतम्।
बाह्येनैवार्थजातेन व्यवहारो विधीयताम्॥

[6.2 आस्थाशैथिल्योपजननाय शून्यवादादिवर्णनं वक्रः पन्थाः]

अथास्थाशैथिल्यजननाय “सर्वं शून्यं सर्वं क्षणिकं निरात्मकम्” इत्युपदिश्यते, तर्हि किमनेन मृषोद्येन। सत्यप्यात्मनि सत्स्वपि स्थिरेषु पदार्थेषु विषयदोषदर्शनद्वारेण भवत्येव विवेकवतो वैराग्यमिति तदुपजननाय शून्यवादादिवर्णनं वक्रः पन्थाः। प्रत्युत प्राज्ञो मुमुक्षुः

---

प्रमाणतोऽशक्य इति। यदि प्रामाणिको वस्तुनिर्णयस्तत्तूष्णीं स्थातव्यम्, अप्रामाणिकश्चेत् प्रमाणाभाव एवोद्भाव्य इति।

**1 कुशकाशावलम्बनम्**] See NM *khyāti* section 2.1.11.1.

**2 °बकव्रतम्**] *Manusmṛti* 4.196: **अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः॥**

**5 अथास्थाशैथिल्य°**] Cf. *Ślokavārttika nirālambana* 201bc: **अर्थनिराक्रियेयम्। आस्थानिवृत्त्यर्थमवादि बौद्धैर्**.

**5** Cf. *Āgamaḍambara* I 54 (46.19–22): **तस्मात्सर्वं शून्यं सर्वं क्षणिकं निरात्मकं सर्वम्। सर्वं दुःखमितीत्थं ध्यायन्निर्वाणमाप्नोति॥**

---

**1 वः**] $MC_1C_2$; **यत्** $M^{kha}V$; **वा** $B_1P_1$; **युत्** $O_1$ **1 कुश°**] $MVB_1C_1C_2P_1$; **कश्य°** $O_1$ **2 तेन**] $M^{kha}VB_1O_1P_1$; **एवं** $MC_1C_2$ **2 °ज्य शून्यवादबकव्रतम्**] $M^{en}VC_2P_1$; **°थ्य शून्यवादबकव्रतम्** M; **°ज्य शून्यवादर्धकव्रतं** $B_1$; +++++++++**तं** $C_1$; **°ज्य शून्यवादरकव्रवम्** $O_1$ **5 °शैथिल्य°**] $MVB_1C_1P_1$; **°शैथिला°** $O_1$ **5 °थास्थाशैथिल्य° ··· °इत्युपदि°**] lacuna $C_2$ **5 सर्वं क्षणिकं**] $MC_1P_1$; **क्षणिकं** $VB_1O_1$ **5 निरात्मकम्**] $M^{kha}P_1$; **सर्वं निरालम्बनम्** $MVC_1$; **सर्वं निरात्मकम्** $B_1$; **सर्वं निराकम्** $O_1$ **6 °ते, तर्हि किमनेन मृ°**] $MB_1C_2P_1$; **°ते तर्हि को ऽयमनेन मृ°** V; +++++++++ $C_1$; **°ते तर्हि कोमनेन पृ°** $O_1$ **7 स्थिरेषु**] $VB_1C_1C_2O_1P_1$; **स्त्रेषु** M **7 विवेकवतो**] $P_1$; **विवेकवतां** $MVC_1C_2O_1$; **विकवतां** $B_1$ **7 वैराग्यमिति ··· मुमुक्षुः क्ष°**] lacuna $C_2$ **8 तदुपजननाय**] $MVB_1C_1O_1P_1^{pc}$; **तदुपजनाय** $P_1^{ac}$ **8 °दिवर्णनं वक्रः पन्थाः**] lacuna $C_2$

क्षणिकनैरात्म्यशून्यवादादिवर्णनं युक्तिबाधितमवबुद्ध्यमानो वञ्चनामयमिव तदुपदेशमाशङ्कते।

[6.3 उपसंहारः]

स एष बुद्धिशून्यानां शून्यवादपरिग्रहः।
प्रतारणपराणां वा, न तु तत्त्वार्थदर्शिनाम्॥
तस्मात् परीक्ष्यमाणो ऽयं शब्दाद्यद्वैतपक्षवत्।
विज्ञानाद्वैतपक्षो ऽपि गन्धर्वनगरायते॥

---

**1 °शून्यवादादि°** ] $P_1$ ; **°शून्यतादि°** $MC_1C_2$ ; **°शून्यवादि°** $VB_1$ ; **°शून्यवादे** $O_1$ **1 °वर्णनं** ] $P_1$ ; **°वचनं** $MVB_1C_1C_2O_1$ **1 °बाधित°** ] $MVC_1C_2O_1P_1$ ; **°बाधत°** $B_1$ **2 वञ्चनामयमिव** ] $MVB_1O_1^{pc}P_1$ ; **वञ्चनमिव** $C_1C_2$ ; **वंचनामयिमिव** $O_1^{ac}$ **2 °शङ्कते** ] $MVB_1C_2^{ac}O_1P_1$ ; **°शंकेत** $C_1C_2^{pc}$ **4 स एष बुद्धिशून्यानां शून्य°** ] $MVB_1O_1P_1^{pc}$ ; **स एव बुद्धिशून्यानां शून्य°** $P_1^{ac}$ ; **स ए**+++++++++ $C_1$ ; **स एष बुद्धिशून्यानां शू**+ $C_2$ **4 °न्यवादपरिग्रहः … परीक्ष्यमाणो ऽयं** ] lacuna $C_2$ **5 न तु** ] $MVC_1O_1P_1$ ; **न त्व°** $B_1$ **5 °दर्शिनाम्** ] $MVC_1O_1P_1$ ; **°दर्शनाम्** $B_1$ **7 ऽपि गन्धर्वनगरायते** ] lacuna $C_1$